1

# लघु-गद्यांश:

इस भाग के अन्तर्गत अपठित लघु-गद्यांश दिया जाता है व उसके नीचे कुछ प्रश्न दिये जाते है, जिनके उत्तर छात्रों को देने होते हैं।

गद्यांश के प्रश्नों के उत्तर लिखने से पहले निम्न बातों का ध्यान रखना आवश्यक है-

1. गद्यांश को तीन-चार बार पढ़कर समझने का प्रयास करना चाहिए, उसके पश्चात् ही प्रश्नों के उत्तर देने चाहिए।
2. गद्यांश में दिये गये अव्ययों तथा विभक्तियों का पूर्ण ध्यान रखना चाहिए।
3. शब्दों के अर्थ स्पष्ट न होने पर भाव ग्रहण करना चाहिए।
4. शीर्षक एक या दो शब्दों में ही होना चाहिए।
5. प्रश्नों को एक स्थान पर ही करना चाहिए।

## अभ्यास:

अधोलिखितानि गद्यानि पठित्वा प्रश्नानाम् उत्तराणि यच्छत-

1. एकदा राजा दिलीप: गुरो: वसिष्ठस्य आश्रमम् अगच्छत्। गुरु: वसिष्ठ: तं कुशलवृत्तान्तम् अपृच्छत्। दिलीप: अपि कुशलवृत्तान्तं पृष्ट्वा न्यवेदयत् यत्- 'हे गुरो! नास्ति मे सन्तनि:, कश्चन उपाय: क्रियताम्' इति। गुरु: वशिष्ठ: दिलीपस्य भाग्यरेखां विलोक्य अवदत्- कामधेनो: शाप: तव सन्तते: अभावस्य कारणम् अस्ति। यदा देवासुरसंग्रामे त्वं देवलोकं अगच्छ:, तदा त्वया कामधेनो: उपेक्षा कृता। तस्या: रोषेण एव पुत्रप्राप्तौ प्रतिरोध: समुपजायते। अत: इदानीं त्वं नन्दिनीं सेवस्व। तस्या: कृपया अवश्यमेव ते सन्तति: भविष्यति इति।

(क) एकपदेन उत्तरत-(एक पद में उत्तर दीजिए)

1. दिलीपेन कस्या: उपेक्षा कृता आसीत्?

   (i) नन्दिन्या: (ii) वसिष्ठस्य (iii) कामधेनो: (iv) आश्रमस्य

2. दिलीप: कस्य आश्रमम् अगच्छत्?

   (i) नृपस्य (ii) वसिष्ठस्य (iii) विश्वमित्रस्य (iv) कामधेनो:

(ख) पूर्णवाक्येन उत्तरत-(पूर्णवाक्य में उत्तर दीजिए)

1. सन्तते: उत्पत्ति: कथं भविष्यति?
2. वसिष्ठ: दिलीपं किम् अवदत्?

(ग) यथानिर्देशम् उत्तरत-(निर्देशानुसार उत्तर दीजिए)

1. 'गुरु: वसिष्ठ:' अनयो: विशेष्यपदं किम्?



Scanned with CamScanner

2. 'तदा त्वया कामधेनोः उपेक्षा कृता' इति वाक्ये कर्तृपदं किम्?

(i) तदा (ii) उपेक्षा (iii) कृता (iv) त्वया

2. श्रीरामः अनुजेन लक्ष्मणेन भार्यया सीतया च सह वनम् अगच्छत्। वने लंकापतिः रावणः छलेन सीताम् अहरत्। रामः लक्ष्मणेन सह सीताम् अन्वेषयत्। तौ वने इतस्ततः अभ्रमताम् परं कुत्रापि सीतां न अपश्यताम्। अन्ते गृध्रराजः सीतायाः विषये सूचनाम् अयच्छत् यत् लंकापतिः रावणः सीताम् अनयत् इति। तौ हनूमतः सुग्रीवस्य च सहायतया लंकाम् अगच्छताम् रावणं च अमारयताम्। एवं राम-लक्ष्मणौ सीतां मोचयित्वा अयोध्यां प्रत्यागच्छताम्।

(क) एकपदेन उत्तरत- (एक पद में उत्तर दीजिए)

1. सीतायाः विषये कः सूचनाम् अयच्छत्?

(i) गृध्रराजः (ii) रावणः (iii) सुग्रीवः (iv) हनुमान् 4

2. कः छलेन सीताम् अहरत्?

(ख) पूर्णवाक्येन उत्तरत- (पूर्णवाक्य में उत्तर दीजिए)

1. श्रीरामः लक्ष्मणेन सह काम् अन्वेषयत्? 2. गृध्रराजः कां सूचनाम् अयच्छत्?

(ग) यथानिर्देशम् उत्तरत- (निर्देशानुसार उत्तर दीजिए)

1. 'अपश्यताम्' अस्य कर्तृपदं किम् अस्ति?

(i) रावणः (ii) श्रीरामः (iii) गृध्रराजः (iv) तौ

2. 'पत्न्या' अस्य पर्यायपदं किम्?

(i) सीतया (ii) भार्यया (iii) अनुजेन (iv) सहायतया

3. दुःखानां मूलम् अज्ञानम् अस्ति इति महापुरुषैः कथितम्। यदि संसारात् अज्ञानस्य नाशः भवेत् तर्हि दुःखानां नाशः स्वयमेव भविष्यति इति तेषां मतम्। वस्तुतः अज्ञानात् एव लोके अनेके विकाराः अन्धविश्वासादयः च उत्पन्ना भवन्ति। अज्ञानी जनः सर्वत्र दुःखितः, शोषितः अवमानितः च भवति। अतः शिक्षा एव तस्य दुःखानि नाशयितुं शक्नोति। अस्मात् अस्माभिः सदैव शिक्षा-दानेन अशिक्षितानां जनानां सहायता कर्तव्या।

(क) एकपदेन उत्तरत- (एक पद में उत्तर दीजिए)

1. दुःखानि का नाशयति?

(i) अज्ञानी (ii) विकाराः (iii) सहायता (iv) शिक्षा

2. दुःखानां मूलं किम् अस्ति?

(i) संसारः (ii) अज्ञानम् (iii) लोकः (iv) शिक्षा

(ख) पूर्णवाक्येन उत्तरत- (पूर्णवाक्य में उत्तर दीजिए)

1. अस्माभिः केषां सहायता कर्तव्या? 2. अनेके विकाराः कथम् उत्पन्नाः भवन्ति?



Scanned with CamScanner

**(ग) यथानिर्देशम् उत्तरत- (निर्देशानुसार उत्तर दीजिए)**

1. 'सदैव' इत्यस्य संधि-विच्छेदं कुरुत।
2. 'संसारात्' इत्यत्र का विभक्ति:?

   (i) तृतीया (ii) पंचमी (iii) चतुर्थी (iv) सप्तमी
3. 'ज्ञानम्' अस्य विलोमपदं किम्?
4. 'अत: शिक्षा एव-०' इति वाक्ये कर्तृपदं किम्?

   (i) तस्य (ii) शिक्षा (iii) अत: (iv) शक्नोति

**4.** **एकस्मिन् वने अश्वत्थ-वृक्षे काक: काकी च अवसताम्। तस्यैव वृक्षस्य कोटरे एक: कृष्णसर्प: अवसत्। स: कृष्णसर्प: सदा काकयो: सन्ततिम् अखादत्। काकी तस्य सर्पस्य नाशाय एकम् उपायम् अचिन्तयत्। सा स्नानाय आगतस्य राजकुमारस्य आभूषणानि तस्य कोटरे अस्थापयत्। सैनिका: काकीम् अनुसरन्त: तम् वृक्षम् उपेत्य कोटरे आभूषणानि अपश्यन्। आभूषणानि कोटरात् नेतुं ते सर्पं लगुडै: आमरयन्। एवं सर्पनाशेन तौ दम्पती प्रसन्नौ अभवताम्।**

**(क) एकपदेन उत्तरत- (एक पद में उत्तर दीजिए)**

1. सैनिका: सर्पं कै: आमरयन्?

   (i) लगुडै: (ii) हस्तै: (iii) पाषाणै: (iv) दण्डै:
2. वृक्षस्य कोटरे क: अवसत्?

   (i) काक: (ii) काकी (iii) सैनिक: (iv) कृष्णसर्प:

**(ख) पूर्णवाक्येन उत्तरत- (पूर्णवाक्य में उत्तर दीजिए)**

1. काकी कस्य आभूषणानि कोटरे अस्थापयत्?
2. दम्पती कथं प्रसन्नौ अभवताम्?

**(ग) यथानिर्देशम् उत्तरत- (निर्देशानुसार उत्तर दीजिए)**

1. 'काकी' इत्यस्य विलोमपदं किम्?
2. 'समीपं गत्वा' इत्यर्थे अत्र क: शब्द: प्रयुक्त:?

   (i) तम (ii) अनुसरन्त (iii) उपेत्य (iv) तस्य

**5.** **विद्याधनं सर्वेषु धनेषु प्रधानं भवति। विद्या एव मानवस्य कल्याणं करोति। वस्तुत: विद्या मानवानां मित्रं, बन्धु:, प्रिया, माता, पिता इव च हितकारिणी भवति। एतत् धनं न भारं करोति न च विभक्तं भवति। न चौरा: चोरयन्ति न च राजा हरति। विद्यां विना मानवस्य जीवनं शून्यं भवति। विद्याहीन: नर: जीवन् अपि न जीवति। विद्यया एव नर: सर्वत्र सम्मानं, यश: धनं च प्राप्नोति। अत: विद्यारहित: नर: पशु: इव कथित:।**

**(क) एकपदेन उत्तरत- (एक पद में उत्तर दीजिए)**

1. विद्यारहित: नर: क: इव कथित:?

   (i) पशु: (ii) अश्व: (iii) गर्दभ: (iv) श्वान:



Scanned with CamScanner

2. किं धनं सर्वप्रधानं भवति?

(i) स्वर्णम् (ii) रजतम् (iii) विद्या (iv) कल्याणम्

**( ख ) पूर्णवाक्येन उत्तरत- ( पूर्णवाक्य में उत्तर दीजिए )**

1. विद्यया नरः किं किं प्राप्नोति?
2. विद्या किं किम् इव मानवानां हितकारिणी भवति?

**( ग ) यथानिर्देशम् उत्तरत- ( निर्देशानुसार उत्तर दीजिए )**

1. गद्यांशात् एकम् अव्ययपदं चिनुत।
2. 'विद्याहीनः नरः' अनयोः विशेषणपदं किम्?

(i) विद्या (ii) हीनः (iii) नरः (iv) विद्याहीनः

**6. प्रातःकाले सूर्यः उदयति। खगाः वृक्षेषु कलरवं कुर्वन्ति। वातावरणम् अतीव मनोहरं भवति। प्रकृतेः सौन्दर्यं मनः हरति। मन्दिरेषु शंखानां नादः भवति। जनाः उद्यानेषु भ्रमणाय गच्छन्ति। पुष्पेषु भ्रमराः गुंजन्ति। याजकाः ईश्वरं स्मरन्ति। ते अनले अपि यजन्ति। बालाः, बालिकाः, महिलाः, पुरुषाः, युवकाः युवत्यः च प्रसन्नाः भवन्ति। भक्ताः स्नानं कृत्वां मन्दिरेषु इष्टदेवं पूजयन्ति तस्मै पुष्पाणि च अर्पयन्ति इष्टदेवं नत्वा प्रसादं च स्वीकृत्य भक्ताः प्रसीदन्ति।**

**( क ) एकपदेन उत्तरत- ( एक पद में उत्तर दीजिए )** 8

1. जनाः भ्रमणाय कुत्र गच्छन्ति?

(i) उद्यानेषु (ii) वनेषु (iii) गृहेषु (iv) मार्गेषु

2. भक्ताः कं स्मरन्ति?

**( ख ) पूर्णवाक्येन उत्तरत- ( पूर्णवाक्य में उत्तर दीजिए )**

1. के प्रसन्नाः भवन्ति?
2. भक्ताः कथं प्रसीदन्ति?

**( ग ) यथानिर्देशम् उत्तरत- ( निर्देशानुसार उत्तर दीजिए )**

1. 'वातावरणं मनोहरम्' अनयोः पदयोः विशेष्यपदं किम्?

(i) वातावरणम् (ii) मनोहरम् (iii) अनयोः (iv) प्रकृतिः

2. 'शंखानाम्' अत्र का विभक्तिः किं वचनम् च प्रयुक्तम्।

(i) प्र. ए. व. (ii) तृ. ब. व. (iii) पं. ए. व. (iv) ष. ब. व.

**7. शैशवकालः अतीव मनोहारी भवति। अस्मिन् काले बालाः आनन्देन इतस्ततः भ्रमन्ति, कूर्दन्ति, हसन्ति, धावन्ति, क्रीडन्ति लपन्ति च। तेषां प्रत्येकं क्रियाकलापं हृदयहारि भवति। न खलु कस्यापि चिन्ता भवति अस्मिन् समये। यद्यपि अभीष्टं भवति, तत्पितरौ यच्छतः। सर्वे जनाः तेषु स्निह्यन्ति। न कोऽपि ताडयति अपितु केवलं लालयति। माता-पितरौ अपि सर्वदिनं तान् अनुगच्छन्ति न च ते कमप्यनुगच्छन्ति।**



Scanned with CamScanner

**( क ) एकपदेन उत्तरत- ( एक पद में उत्तर दीजिए )**

1. शिशुभ्य: अभीष्टं वस्तु कौ यच्छत:?

(i) मातरौ (ii) पितरौ (iii) भ्रातरौ (iv) सर्वे

2. क: काल: मनोहारि भवति?

(i) बाल्यकाल: (ii) प्रात:काल: (iii) शैशवकाल: (iv) सायंकाल:

**( ख ) पूर्णवाक्येन उत्तरत- ( पूर्णवाक्य में उत्तर दीजिए )**

1. अस्मिन् समये कस्य चिन्ता न भवति?

2. शैशवकाले बाला: किं किं कुर्वन्ति?

**( ग ) यथानिर्देशम् उत्तरत- ( निर्देशानुसार उत्तर दीजिए )**

1. 'समये' इत्स्य पर्यायपदं गद्यांशात् चिनुत।

2. 'यत्र-तत्र', इत्यर्थे अत्र क: शब्द: प्रयुक्त:?

(i) यत: (ii) तत: (iii) इतस्तत: (iv) सर्वत्र

8. **इदम् एकम् उपवनम् अस्ति। उपवने अनेकानि पुष्पाणि विकसन्ति। पुष्पेषु भ्रमरा: गुंजन्ति तेषां रसं च पिबन्ति। अत्र अनेके वृक्षा: अपि सन्ति। वृक्षेषु खगा: मधुरं कूजन्ति। तेषां कलरव: चित्तम् आकर्षति। उपवनस्य शोभां द्रष्टुं जना: दूरदेशेभ्य: आगच्छन्ति। अस्य हरीतिमा नयने प्रसादयति। अत्र जना: प्रात: सायं व भ्रमणाय आगच्छन्ति मनोविनोदं च कुर्वन्ति।**

**( क ) एकपदेन उत्तरत- ( एक पद में उत्तर दीजिए )**

1. उपवने कानि विकसन्ति?

(i) वनानि (ii) रसानि (iii) अनेकानि (iv) पुष्पाणि

2. भ्रमरा: कुत्र गुंजन्ति?

(i) वृक्षेषु (ii) पुष्पेषु (iii) उपवनेषु (iv) रसेषु

**( ख ) पूर्णवाक्येन उत्तरत- ( पूर्णवाक्य में उत्तर दीजिए )**

1. किं चित्तं आकर्षति?

2. अत्र जना: किमर्थम् आगच्छन्ति?

**( ग ) यथानिर्देशम् उत्तरत- ( निर्देशानुसार उत्तर दीजिए )**

1. 'पुष्पेषु' अस्य पदस्य विभक्तिं लिखत।

(i) प्रथमा (ii) सप्तमी (iii) तृतीया (iv) चतुर्थी

2. 'अनेकानि पुष्पाणि' अनयो: विशेषणपदं किम्?



Scanned with CamScanner

9. एकस्मिन् वने एकः शृगालः निवसति स्म। तस्य मैत्री बकेन सह अभवत्। एकदा शृगालः बकं स्वगृहे भोजना निमन्त्रितवान्। प्रसन्नबकः यदा भोजनाय अगच्छत् तदा चतुरः शृगालः स्थाल्यां तस्मै पायसम् अयच्छत् अवद च-मित्र! आवां सहैव अस्मिन् पात्रे भोजनं कुर्वः। बकः दीर्घचंच्वा भोजनग्रहणे समर्थः न भवति। बकः अपि शृगा भोजनाय निन्त्रयति घटे च भोजनं यच्छति। घटात् भोजनग्रहणे असमर्थः शृगालः बकस्य मुखं पश्यति। एवं बक शृगालस्य प्रतिशोधं करोति।

(क) एकपदेन उत्तरत-(एक पद में उत्तर दीजिए)

1. शृगालः स्थाल्यां किम् अयच्छत्?

(i) भोजनम् (ii) पात्रम् (iii) पायसम् (iv) शाकम्

2. बकेन कस्य सह मैत्री अभवत्?

(i) शृगालस्य (ii) भोजनस्य (iii) भल्लूकस्य (iv) सिंहस्य

(ख) पूर्णवाक्येन उत्तरत-(पूर्णवाक्य में उत्तर दीजिए)

1. बकः कस्माद् भोजनग्रहणे समर्थः न अभवत्?

2. बकः शृगालं किमर्थं निमन्त्रयति?

(ग) यथानिर्देशम् उत्तरत-(निर्देशानुसार उत्तर दीजिए)

1. 'पात्रे' अत्र का विभक्तिः?

(i) प्रथमा (ii) तृतीया (iii) पंचमी (iv) सप्तमी

2. 'प्रसन्नः' अस्य विलोमपदं किम्?

(i) तुष्टः (ii) दुःखी (iii) प्रेमी (iv) स्नेही

10. (क) पंच लघुकथाः संस्कृतेन लिखत— संस्कृत में कोई पाँच लघुकथाएँ लिखिए— (Write any five short storie in Sanskrit)

(ख) पाठ्यपुस्तकस्य पंचसु लघुषु गद्यांशेषु प्रश्नोत्तराणि रचयत— (पाठ्यपुस्तक के पाँच लघु-गद्यांशों पर प्रश्नोत्त बनाइए— (Frame questions and answers on any five short passages of the textbook)



Scanned with CamScanner